# शिक्षाक्षेत्रे संस्कृतभाषाधिगमे प्रचारप्रसारमाध्यमानाम् उपयोगिता

दीपान्विता दास
शोधश्छात्रा, शिक्षाविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:।

**Article Info**
Volume 5, Issue 4
Page Number : 47-50

**Publication Issue :**
July-August 2022

**Article History**
Accepted : 01 July 2022
Published : 20 July 2022

**सारांश**:- मानवस्याधिगमप्रक्रिया जन्मत: एव भवति। अत: अधिगम: मानवजीवने आजीवनं भवतीति कथने नातिशयोक्ति:। अधिगमाय न कोऽपि निश्चित: समय:, न किञ्चित् निश्चितं स्थानं भवति। मानव: सर्वदा सर्वत्र च कथञ्चित् अधिगमं प्राप्नोति। न केवलं शिक्षासंस्थाभ्य: अपि च परिवारात्, सामाजिकसंस्थाभ्य:,अनुभवेन वा व्यवहारे जायमानशश्वतरुपपरिवर्तनमेव। आवश्यकता प्रवृत्ते: कारणं भवति। सुखदु:खानुभवानां प्रवृत्तिनिवृत्तीनाम् उपायान्वेषणप्रक्रियया नूतनविषयान् अधिगच्छन्ति चेत् सा एव अधिगमप्रक्रिया इति। अत: एतेषां विषये यानि उपकरणानि अस्माभि: प्राप्यन्ते तान्याधारकृत्य शोधलेख: अयं मया सारल्येन विरच्यते।

**विशेषशब्दा**:- संस्कृतभाषाधिगम:– सङ्गणकम्, दूरदर्शनम् ,अन्तर्जालम्, आकाशवाणी,संस्कृतमासिका वार्तापत्रिका च , चलचित्रम् ,नाटकम् ,संस्कृतसम्भाषणशिबिरम् इत्यादय:।

आधुनिकभौतिकवादयुगे संस्कृतभाषाया: अतिमहत्त्वपूर्ण: स्थानमस्ति। समग्रमपि पुरातनं भारतीयं वाङ्मयं संस्कृतमाश्रित्यावतिष्ठते इति सुविदितम्। न केवलं भारतीय संस्कृतिसंरक्षणार्थमेवावश्यकं संस्कृतमपितु, संस्कृतमेतत् विश्ववाङ्मयस्य पथप्रदर्शकम्, जीवनदर्शनस्य दर्शकम्, आचारशास्त्रस्य शिक्षकम् , पुरुषार्थस्य प्रयोजनम्, विविधविरुद्धसंस्कृतसमाहारसाधकम्, प्रान्तीयानां प्रादेशिकानाञ्च प्रशमनं राष्ट्रियभावनाया: सदवृत्ततायाश्चाभिवृद्धेर्मूलम्, वैदिकवाङ्मयालोकस्य प्रसारहेतु:, आध्यात्मिककथा भौतिककथाश्च समुन्नते:साधनमिति सुतरामवधेयम्। संस्कृत्या वाङ्मयेन च विहीनस्य देशस्य जातेचाध पतनमनिवार्यम्। द्वयोरेवैतयो: संरक्षणेन संवर्धनेन च समेधते। श्री: सर्वस्या अपि संस्कृते: इत्येतदेवावधार्य संस्कृतस्य संरक्षणस्य प्रचारस्य प्रसारस्य च भूयस्यावश्यकताऽनुभूयते आधुनिकुयगे। संस्कृतभाषाया: पठनपाठनक्रियायां नूतनपद्धती: आश्रित्य वयं सुलभतया अस्या: अध्ययनं कर्तुं शक्नुम:। संस्कृतभाषायां प्रचारप्रसारमाध्यमानाम् उपयोग: यदि क्रियते तर्हि अवश्यं छात्रा: सर्वे संस्कृतमवगन्तु: प्रभावन्ति। संस्कृतभाषा सरलीकर्तुं प्रचारप्रसारमाध्यमानाम् उपयोग: संस्कृतभाषाविकासाय कारको भविष्यति।

**संस्कृतभाषाधिगम**:- मानवस्याधिगमप्रक्रिया जन्मत: एव भवति। अत: अधिगम: मानवजीवने आजीवनं भवतीति कथने नातिशयोक्ति:। अधिगमाय न कोऽपि निश्चित: समय:, न किञ्चित् निश्चितं स्थानं भवति। मानव: सर्वदा सर्वत्र च कथञ्चित् अधिगमं प्राप्नोति। न केवलं शिक्षासंस्थाभ्य: अपि च परिवारात्, सामाजिकसंस्थाभ्य:,अनुभवेन वा व्यवहारे जायमानशश्वतरुपपरिवर्तनमेव। आवश्यकता प्रवृत्ते: कारणं भवति। सुखदु:खानुभवानां प्रवृत्तिनिवृत्तीनाम् उपायान्वेषणप्रक्रियया नूतनविषयान् अधिगच्छन्ति चेत् सा एव अधिगमप्रक्रिया इति। शिक्षाशास्त्रिणोऽमनोविज्ञानसिद्धान्तान्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अङ्गीचिकिर्षन्त: अध्ययनाभ्यासादिभि: जीवस्य भाषाया: चतुर्षु कौशलेषु य: विपरिणाम: जायते स एव भाषाधिगम: इत्याचक्षन्ते। अत: संस्कृतभाषाधिगम: इति पदेन संस्कृतभाषाया: श्रवणभाषणपठनलेखनकौशलेषु छात्रै: अधिकारसम्पादनमित्यर्थ: बुध्यते।

**संस्कृतभाषाधिगमे प्रचारप्रसारमाध्यमानाम् उपयोगिता –** यद्यपि एते संस्कृतविषया: अर्वाचीना: तथापि तेषां मूलधारा: सैद्धान्तिकरूपेण संस्कृतसाहित्ये निहिता: विद्यन्ते। यत: ये अधिगमप्रक्रिया: सिद्धान्ता: मनौवैज्ञानिकै: प्रतिपादिता: तेषां मूलविचारा: संस्कृतसाहित्ये विद्यन्त इति प्रामाणिकरूपेण निरूपयन्त: सन्ति भारतीया:। एतदतिरिच्य प्रचारप्रसारमाध्यमानां साहाय्येनापि सुलभतया अधिगमं सम्पादयितुं शक्यते तत्र विशेषरूपेण सङ्गणकं , दूरदर्शनम्, अन्तर्जालम्, आकाशवाणी, संस्कृतमासिका वार्तापत्रिका च, संस्कृतसम्भाषणशिबिरं, चलचित्रं, नाटकम् इति।

**सङ्गणकम् –** प्रतिदिनं परिवर्तित सामाजिक-आर्थिक-वैश्विक-संरचनायां शिक्षाया: गुणात्मकस्वरूपे अत्यन्तमहत्त्वं प्रदीयमानमस्ति। येन शिक्षाजगति यान्त्रिकीकरणं सङ्गणकस्य काल: इत्युदीर्यते। साम्प्रतं प्रत्येकं ज्ञानक्षेत्रे निरन्तरविकासत्वात् सर्वत्र दृष्टि: प्रसारयितुं न शक्यते। तदनुगुणम् अल्पेनैव श्रमेण अल्पीयसि काले बहून् विषयान् ज्ञातुं सम्प्रयते मानव:। न केवलं ज्ञानप्राप्तिक्षेत्रे अपि तु शिक्षणस्य, शिक्षणदानस्य च क्षेत्रे पूर्वोक्तरीत्या अल्पश्रमेण अल्पसमये च बहुषु छात्रेषु उत्तमतया शिक्षणाधिगमपरिस्थितिम् उत्पाद्य ज्ञानस्य सञ्चारार्थं सङ्गणकयन्त्रं महत्त्वपूर्णसाधनम् इति मन्यते। अद्य शिक्षाक्षेत्रे सङ्गणकं प्राविधिकीं सामाजिकीं च क्रान्तिम् उत्पादयत् वर्तते। भाविसंसारस्य स्वरूपं निर्मातुम् एतत् निर्माणकर्तृत्वेन एकं शक्तिशालि विद्युद् यन्त्रम्। मानवसमाजे एतादृशयन्त्रस्य आविर्भावेन समाजस्य प्रत्येकं क्षेत्रम् अनेन प्रभावितं दरीदृश्यते। अथ च सङ्गणकयन्त्रस्य प्रयोगेन इन्द्रियाणि प्रभावयन्ति। तदद्वारा अधिगमं सफलयन्ति। अध्ययनाध्यापने विशिष्य संस्कृतभाषाधिगमप्रसङ्गे सङ्गणकयन्त्रस्य उपयोग: अनुभयते।

**दूरदर्शनम्** – संस्कृतभाषाधिगमे प्रचारप्रसारमाध्यमानां प्रामुख्यता दरीदृश्यते। शिक्षाक्षेत्रे त्रिविधानि उपकरणानि उपयुज्यन्ते। तेषु दृश्यश्रव्योपकरणेषु इदं दूरदर्शनम् अन्तर्भवति। यद्यपि प्राचीनकाले उपकरणानामभाव: तथापि अध्यापककेन्द्रितशिक्षा आसीत्। परन्तु साम्प्रतिककाले अध्यापककेन्द्रितशिक्षा न सङ्गच्छते। अत: नूतनाधिगमसिद्धान्ता:, उपकरणानि, प्रविधिय: च आविष्कृता:। तत्र बहुनि महत्तराणि उपकरणानि विद्यन्ते संस्कृतभाषाधिगमाय। तथापि दूरदर्शनमपि संस्कृतभाषाधिगमे उपकरोतीति मे मति:। रेडियोयन्त्रस्य विकसितं रूपं भवति दूरदर्शनम्। इदानीं तु उचितसंस्कृतकार्यक्रमा: दूरदर्शनेन प्रसार्यन्ते। अत्याधुनिकपदानां भाषान्तरीकरणं दूरदर्शन सम्बद्धेषु वार्तादिकार्यक्रमेषु भवति। या च कठिनता संस्कृतभाषाया: तां दूरीकृत्य विभिन्नशैक्षिककार्यक्रमा: प्रसार्यन्ते दूरदर्शने। दूरदर्शनेन 05 निमेषात्मक: संस्कृतसमाचार: पूर्वत एव प्रसार्यते। साम्प्रतम् अपि तस्य प्रसारणं तथैव अबाधरूपेण भवति। अनेन सर्वकारेण अर्धहोरात्मक: एक: नूतन: कार्यक्रमा: वार्तावली नाम्ना इतोऽपि आरब्ध: कृत:।

**अन्तर्जालम्** – सामाजिकक्षेत्रेषु सर्वेष्वपि अस्य प्रभाव: द्विगुणितो सञ्जात: वर्तते। तत्र विद्यालयेऽपि अद्वितीय:। साम्प्रतिकशिक्षाव्यवस्था छात्रकेन्त्रिता विद्यते। अध्यापक: केवलं मार्गदर्शक एव विद्यते। छात्रा: अन्तर्जालमाध्यमेन सर्वं स्वयमध्येतुं प्रयत्नमाना: सन्ति। अन्तर्जाले तादृशं पठनपाठनसौविध्यं छात्रेभ्य: कल्पितं विद्यते। अस्यामपि पद्धतौ अध्यापका: छात्रेभ्य: मार्गनिर्देशनं प्रदातुं शक्नुवन्ति। संस्कृतभाषाधिगमाय (श्रवण-भाषण-पठन-लेखनकौशलानां) विकासाय अध्यापकाभावे व्यवस्थेयं बहूपकरोति। भाषाप्रयोगशालेति नाम्ना संस्कृतभाषाधिगम: प्रचारप्रसाराय अस्योपयोग एव सम्प्रति शिक्षाक्षेत्रे क्रियते। राष्ट्रियपात्रतापरीक्षा (NET) सार्वजनीन शिक्षासंस्थाया (P.S.C) बह्व्य: परीक्षा अन्तर्जालमाध्यमेन प्रचाल्यन्ते। न केवलं परीक्षानिर्वहणं, तेन सह तत्सम्बन्धकार्याणि सर्वाण्यपि अन्तर्जालमाध्यमेन ज्ञातुं शक्यन्ते।

**आकाशवाणी** – आधुनिकुयगे आकाशवाणी शिक्षाया: महत्त्वपूर्णं साधनं मन्यते। जना: अनेन सुदूरेष्वपि स्थलेषु जायमानानां घटनानां विवरणं राजनैतिक, ऐतिहासिक, सांस्कृतिक, शैक्षिकविषयेषु आयोजितं व्याख्यानं श्रुत्वा ज्ञानमर्जयन्ति। तावन्तं महत्त्वं कल्पितम् आकाशवाण्या प्रात:काले पञ्चोनसप्तवादने संस्कृतवार्ता: प्रसार्यन्ते।

**संस्कृतमासिका वार्तापत्रिका च** – संस्कृतभाषाधिगम: प्रचारप्रसारार्थं बहव्य: वार्तापत्रिका: विद्यन्ते। संस्कृतचन्द्रिका, संस्कृतमञ्जरी, रसना, वाकोवाक्यम्, प्रज्ञालोकम्, संस्कृतप्रतिभा, लोकभाषा, सुश्रि:, आरण्यकम्, ब्रह्मविद्या, सागरिका, विश्वसंस्कृतम् इत्याद्य: मुख्यपत्रिका: भवन्ति। एतत् सर्वं संस्कृतभाषाधिगमे प्रचारप्रसारार्थं मुख्यं योगदानं वहति।

**चलचित्रम्** – अधुना चलचित्रद्वाराऽपि संस्कृतभाषाधिगमस्य प्रचारप्रसार: भविष्यति। **श्री शङ्कराचार्य**: भवति प्रथमसंस्कृतचलचित्रम्। 1993 तमे वर्षे **भगवद्गीता** इति नाम्ना द्वितीय संस्कृतचलचित्रम् आगतम्। एतादृशरूपेण अन्यभाषासु समानरीत्या संस्कृतचलचित्रं संस्कृतप्रचारोण उत्तमाविष्कार: अपि भवति।

**नाटकम्** – संस्कृतसाहित्ये नाटकं रमणीयं काव्यं भवति। अत: संस्कृते नाटकस्य विशिष्टं स्थानं वर्तते। चलचित्राणां प्रचारेण यद्यपि नाटकस्य आकर्षणं न्यूनम् अभवत् तथापि अनेकेषु क्षेत्रेषु अधुनापि नाटकम् आकर्षकं भवति। संस्कृतनाटकस्य मनोरञ्जनपूर्वक संस्कृतभाषा प्रसारयितुं शक्यते। एवमेव संगोष्ठी, वाक्यार्थस्पर्धा माध्यमेनाऽपि संस्कृतभाषाधिगम उत्तमतया प्रचारप्रसारमाप्नोति।

**संस्कृतसम्भाषणशिबिरम्** – संस्कृतं पठनीयम्, संस्कृतेन भाषणं करणीयम् इति इच्छुका: बहव: सन्ति। अद्य संस्कृतभारती सर्वत्र संस्कृतभाषणशिविरद्वारा संस्कृतभाषाधिगमे प्रचारप्रसारमाध्यमानां मुख्यं योगदानं निर्वहति। सरलभाषया कथं संस्कृत पाठनीयम् इति संस्कृतभारती प्रत्यक्षरूपेण प्रदर्शयति। संस्कृतभारती भाषाऽध्यापनानि अधिकतया क्रीडारूपेण पाठयति। पदक्रीडा, अन्तिमाक्षरक्रीडा इत्यादि माध्यमेन च तत्र भाषां पाठयति। यत्र यत्र पश्यतु तत्र तत्र **संस्कृतम्** इतीदं संस्कृतभारत्या: शिबिरवचनं वर्ततेऽवधेयं यथार्थम्।

**उपसंहार**: – सम्पूर्णदेश: संस्कृतस्य विशालं क्षेत्रम् अस्ति। सर्वेष्वपि विद्यालयेषु संस्कृतभाषा द्वितीयभाषात्वेन, तृतीयभाषात्वेन वा पाठ्यमाना वर्तते। सम्प्रति प्राथमिकस्तरादपि संस्कृतस्य पठनपाठनव्यवस्थायै प्रयासा: क्रियन्ते। संस्कृतविश्वविद्यालया: संस्कृताकादम्या: च भारतस्य अनेकेषु राज्येषु सन्ति। तत्र संस्कृतस्य पाठनं प्रचलति। जना: शोधकार्यं कुर्वन्ति। न हि एकस्या: संस्कृतवाहिन्या: सञ्चालने अपि तेषां योगदानं भवेत्। राष्ट्रियसंस्कृतविश्वविद्यालय:,केन्द्रीयसंस्कृतविश्वविद्यालयस्य अधीने 12 महाविद्यालया: वर्तन्ते, एतत् सर्वम् अस्माकं संस्कृतभाषाधिगमविकास: एव दरीदृश्यते। भाषाया: अभिज्ञानं सम्प्रेषणेन भवति। संस्कृतस्य अध्यापक: एव मुख्यत: संस्कृतप्रचारप्रसारार्थं मुख्यमाध्यमम् इति वक्तुं शक्यते। संस्कृतभाषाधिगम: प्रचारप्रसारार्थम् एतादृशा बहवो माध्यमा: सन्ति चेदपि सर्वे संस्कृतभाषायां व्यवहारं कुर्यु:। एवं विचारदृष्ट्या विविच्यते चेत् संस्कृत राष्ट्रभाषापदम् अलङ्कर्तुं सर्वथा समर्था योगयुक्ता च भवति।

**परिशीलितग्रन्थसूची**


1. शैक्षिक तकनीकी एवं प्रबन्ध - जे. सी. अग्रवाल - आगरा - 2 - 2003.
2. Educational Technology, Management and Evaluation - J.C. Aggarwal - 2005.
3. शिक्षा मनोविज्ञान - एस. पी. कुलश्रेष्ठ - मेरठ - 2006 .
4. अधिगम एवं विकास के मनोवैज्ञानिक आधार - डाँ. आर. ए. शर्मा - मेरठ - 2009.
5. शिक्षण अधिगम का मनोविज्ञान - प्रो. सुदेश भटनागर & सुरेश  जोशी - मेरठ - 2010.
6. शिक्षामनोविज्ञानम् - पि.  नागमुनिरेड्डि - राष्ट्रियसंस्कृतविद्यापीठम्- 2011.
7. शैक्षिक प्रौदोगिकी एवं कक्षा-कक्ष प्रबन्ध - डाँ. सूर्यदेव गुप्ता, प्रो. एम.पी.सिंह त्यागी, ओंकार सिंह त्यागी - जयपुर - 2012.